'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 6th Semester Examination, 2022

## DSE-P3-SANSKRIT

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

**The question paper contains DSE-3A and DSE-3B.**
**Candidates are required to answer any *one* from the *two* papers and they should mention it clearly on the Answer Book.**

## DSE-3A

1. संस्कृतभाषया देवनागरीलिप्या च द्वयोः प्रश्नयोः उत्तरं प्रदेयम् – 12×2 = 24

(क) मनुसंहितामवलम्ब्य सृष्टिप्रक्रिया सविस्तारेण व्याख्येया।

(ख) मनुसंहितायां प्रथमाध्याये मनुष्येतरजातीनां उत्पत्तिः आलोचनीया।

(ग) म्नुसंहितामधिकृत्य चतुवर्णानामुत्पत्तिः तेषां कर्मणि च आलोचयत।

2. संस्कृतभाषया देवनागरीलिप्या व्याख्या कार्या (एकस्य) 6×1 = 6

(क) यत्तत् कारणमव्यक्तं नित्यं सदसदात्मकम्।
तद्विसृष्टः स पुरुषो लोके व्रह्मेति कीर्त्यते॥

(ख) आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुत्पभिब सर्वतः॥

3. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) 6×2 = 12

(क) सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासुवीजमवासृजत्॥

(ख) तदाविशन्ति भूतानि महान्ति सह कर्मभिः।
मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम्॥

(ग) अन्व्यो मात्रा विनाशिन्यो दशर्धानां तु याः स्मृताः।
ताभिः सार्धमिदं सर्वं सम्भवत्यनुपूर्वशः॥

4. संस्कृतभाषया देवनागरीलिप्या च टिप्पणी लेखनीया (चतुर्णाम्) 3×4 = 12

स्वयम्भुः, व्याक्ताव्यक्तम्, पञ्चमहाभूत् त्रिगुणम्, शंसितव्रतः, पञ्चमहायज्ञः

5. संस्कृतभाषया देवनागरीलिप्यां षण्णां संक्षिप्तोत्तरं प्रदेयम् – 1×6 = 6

(क) कस्माद् आप उत्पद्यते ?

(ख) मनुसंहितायाः प्रथमाध्यायस्य नाम किम् ?

(ग) प्रथमपुरुषरूपेण कः आविर्भूतोऽभवत् ?

(घ) प्रजापत्युपाधिभूताः निर्दिष्टाः महर्षयः के ?

(ङ) मनुष्यः कदा व्याधिशून्यः आसीत् ?

(च) सत्य-त्रेता-द्वापरेषु किमासीत् मनुष्याणां श्रेष्ठः धर्मः ?

(छ) ब्रह्मानिर्दिष्टानां ब्राह्मणानां कार्यानि कानि ?

(ज) मन्वर्थमुक्तावलीति ढीकायाः लेखकः कः ?

(झ) कानि पञ्चेन्द्रियाणि ?

## DSE-3B

## Unit-I

1. संस्कृतभाषया देवनागरीलिप्या च एकस्योत्तरं प्रदेयम् – 12×1 = 12

(क) 'नारीणां दूषणानि षट्'– चन्दनदास-लीलावतीकथामधिकृत्य आलोच्यताम्।

(ख) चित्रग्रीव-हिरण्यककथामालोच्य तस्याः उपदेशः व्याख्येय।

2. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) 3×2 = 6

(क) न हि तद्विद्यते किञ्चिद्यर्थेन न सिद्ध्यति।
यत्नेन मतिमास्तस्मादर्थमेकं प्रसाधयेत्॥

(ख) अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।
विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषम्॥

(ग) स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः।
तेन नारद नारीणां सतीत्वमुपजायते॥

3. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) इहलोके हि धनिनां परोऽपि स्वजनायते।
स्वजनोऽपि द्ररिद्राणां सर्वदा दर्जनायते॥

(ख) यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥

4. संस्कृतभाषया देवनागरीलिप्या षण्णां संक्षिप्तोत्तरं प्रदेयम् – 1×6 = 6

(क) सर्वद्रव्येषु विद्या कथं श्रेष्ठः ?

(ख) विद्या किं ददाति ?

(ग) कः सुदर्शनः ? सः एकदा किं श्रुतवान् ?

(घ) धर्मलाभस्य उपायः कः ?

(ङ) कीदृशं दानं सफलं भवति ?

(च) केषु विश्वासः न कर्तव्यः ?

(छ) हितोपदेश इति ग्रन्थस्य लेखकः कः ?

(ज) के सन्ति षड्दोषाः ?

## Unit-II

5. संस्कृतभाषया देवनागरीलिप्या च एकस्योत्तरं प्रदेयम् – 12×1 = 12

(क) पञ्चतन्त्रस्य मित्रभेदांशे बक-कर्कटकथा स्वभाषया व्याख्यायताम्।

(ख) पञ्चतन्त्रमधिकृत्य सिंह-शशककथा आलोच्यताम्।

6. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) 3×2 = 6

(क) अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तत्र सकलार्थिसार्थकल्पद्रुमः प्रवरनृपमुकुटमणिमरीचिमञ्जरी–चयचर्चितचरणयुगलः सकलकलापरं गतोऽमरशक्तिर्नामा राजा बभूव। तस्य त्रयः पुत्राः परमदुर्मेधसो वसुशक्ति-रुग्रशक्तिरनेकशक्तिश्चेति नामानो बभूवुः।

(ख) आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा।
परिवर्तिनि संसारे मृतः को वा न जायते॥

(ग) पूज्यते यदपूज्योऽपि पदगम्योऽपि गम्यते।
वन्द्यते यदवन्द्योऽपि स प्रभावो धनस्य च॥

7. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) मूर्खाणां पण्डिता द्वेषया निर्धनानां महाधनाः।
व्रतिनः पापशीलानाम् असतीनां कुलस्त्रियः॥

(ख) इह लोके हि धनिनां परोऽपि स्वजनायते।
स्वजनोऽपि दरिद्राणां सर्वदा दुर्जनायते॥

8. संस्कृतभाषया देवनागरीलिप्या च षण्णां संक्षिप्तोत्तरं प्रदेयम् – $1\times6 = 6$

(क) 'पञ्चतन्त्रम्' इति नामकरणस्य कारणं किम् ?

(ख) 'पञ्चतन्त्रम्' इति गल्पग्रन्थस्य रचयिता कः ?

(ग) पञ्चतन्त्रे कति कथाः सन्ति ?

(घ) वर्धमाननगरस्य पुरनायकस्य नाम किमासीत् ?

(ङ) नीलवर्ण-श्रृगालस्य नाम किम् ?

(च) के आसन् मदोत्कटस्य अनुचराः ?

(छ) को आसीत् महिलारोप्य नगरस्य राजा ?

(ज) सञ्जीवकः कः ?

(झ) विष्णुशर्मा किमर्थं पञ्चतन्त्रं रचितवान् ?

——×——